# मनोगतम् [०२.३३] उपाख्यानम्-८६ 'मनकीबात', प्रसारण-तिथि: - २७-फरवरी,२०२२

[भाषान्तरं- डॉ.सुधीष्टमिश्र-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः, नमस्कारः | 'मनकीबात'-कार्यक्रमे पुनरेकवारं भवतां सर्वेषां स्वागतम् | अद्य 'मनकीबात'-कार्यक्रमस्य आरम्भं वयं, भारतस्य सफलतायाः उल्लेखेन साकं करिष्यामः | एतन्मासारम्भे भारतम्, इटलीतः स्वीयं बहुमूल्यरिक्थं प्रत्यानेतुं सफलम् अभवत् | इदं रिक्थं वर्तते - अवलोकितेश्वर-पद्मपाणि-भगवतः सहस्राधिक-वर्षेभ्यः पुरातनी प्रतिमा | मूर्तिरियं कतिपयवर्षेभ्यः प्राक्, बिहार-राज्ये गया-तीर्थस्य देवीस्थान-कुंडलपुर-मंदिरात् चोरिता आसीत् | परञ्च अनेकविधानां प्रयासानाम् अनन्तरं साम्प्रतं भारतम् इमां प्रतिमां प्रत्यवाप्नोत् | एवमेव कतिपयवर्षेभ्यः प्राक्, तमिलनाडु-राज्यस्य वेल्लूरात् भगवतः हनुमतः आंजनेय्यरस्य, हनुमतः प्रतिमा मुषिता आसीत् | भगवतः हनुमतः इयं मूर्तिरपि षट्तः - सप्तशतवर्ष-प्राचीनासीत् | एतन्मासारम्भे, ऑस्ट्रेलियादेशात् एनां वयं प्राप्तवन्तः, अस्मदीयम् अभियानम् एनां प्राप्तवत् |

सखायः, सहस्रवर्षेभ्यः अस्माकम् इतिहासे, देशस्य प्रतिकोणं क्रमशः उत्कृष्टतमाः मूर्तयः सर्वदैव निर्मिताः, एतासु श्रद्धा अपि आसीत्, सामर्थ्यम् अपि अवर्तत, कौशल्यम् अपि अविद्यत, अथ च वैविध्यपूर्णता तु आसीदेव । अस्माकं च प्रत्येकं मूर्तीनाम् ऐतिह्ये तत्कालीनः प्रभावः अपि दृश्यते । एताः मूर्तयः, भारतस्य मूर्तिकलायाः अप्राप्याः उदाहरणभूताः तु आसन् एव, एताभिः सह अस्माकीना आस्था अपि सम्पृक्ता आसीत् । परन्तु, पुरा अनेकाः मूर्तीः अपहृत्य ताः भारतात् बहिः नीताः । कदाचित् एतस्मिन् देशे, कदाचित् च, तस्मिन् देशे, एताः मूर्तयः विक्रीताः, अथ च इमाः तेभ्यः केवलं कलाकृतयः आसन् । न तासाम् ऐतिह्यविषये ते रुचिमन्तः आसन्, न वा तासु तेषां श्रद्धा आसीत् । एतासां मूर्तीनां प्रत्यानयनं, भारतमातरं प्रति अस्मदीयं दायित्वम्

अस्ति । एतासु मूर्तिषु भारतस्य आत्मनः, आस्थायाः च अंशः अस्ति । एतासां किञ्चन सांस्कृतिकम् ऐतिहासिकं च महत्वम् अपि अस्ति । एतम् दायित्वम् अवगम्यमानेन भारतेन स्वकीयाः प्रयासाः वर्धिताः । अथ, एतेन कारणेन चौर्यप्रवृत्तिवत्सु भयम् अपि उत्पन्नम् । येषु देशेषु एताः मूर्तीः अपहृत्य नीताः आसन्, अधुना ते अपि अवगच्छन्तः सन्ति यत् भारतेन सह सम्बन्धदृशा सौम्यशक्त्याः संवादार्थं यः कूटनीतिकमार्गः भवति, तस्मिन् एतस्य अपि महत्वम् अधिकं भवितुम् अर्हति । यतः एतेन सह भारतस्य भावनाः सम्पृक्ताः सन्ति, भारतस्य श्रद्धा सम्पृक्ता अस्ति, अथ च , एकप्रकारेण प्रतिजनं सम्बन्धस्थापने अपि एतत् शक्तिम् उत्पादयति । अधुना कतिपयदिनानि पूर्वं भवद्भिः दृष्टं स्यात्, काशीतः चोरिता मातुः अन्नपूर्णादेव्याः प्रतिमा अपि प्रत्यानीता । एतत् भारतं प्रति परिवर्तमानायाः वैश्विकदृष्ट्याः उदाहरणम् अस्ति । (2013) त्रयोदशाधिक- द्विसहस्रतमवर्षं यावत् प्रायः त्रयोदशप्रतिमाः भारतम् आयाताः । परं, गतेषु सप्तवर्षेषु द्विशताधिकाः (200) बहुमूल्य-प्रतिमाः, भारतेन सफलतापूर्वकं प्रत्यानीताः । अमेरिका-ब्रिटेन्-हॉलैंड-फ्रांस्-कनाडा-जर्मनी-सिंगापुरादिभिः, एतादृशैः च अनेकैः देशैः भारतस्य एषा भावना अवगता, अथ च मूर्तीनां प्रत्यानयने एतैः अस्माकं सहयोगः कृतः । अहं गतवर्षस्य सेप्टेम्बरमासे यदा अमेरिकादेशं गतः, तदा तत्र अत्यन्तं पुरातनीः प्रतिमाः, सांस्कृतिक-महत्वस्य च वस्तूनि प्राप्तवान् । यदा देशस्य कश्चन बहुमूल्यन्यासः प्रतिप्राप्तः भवति, तदा स्वाभाविकम्, इतिहासे श्रद्दधानाः, पुरातत्त्वशास्त्रे श्रद्धावन्तः, आस्था-संस्कृति-सम्पृक्ताः जनाः, अथ च हिन्दुस्थानित्वेन वयं, संतोषम् अनुभवामः ।

भारतीयसंस्कृतेः अथ च स्वन्यासस्य विषये वदन् अद्य अहं 'मनकीबात' कार्यक्रमे भवतः सर्वान् द्वाभ्यां मेलयितुम् इच्छामि । एतेषु दिनेषु फेस्बुक्, ट्विटर्- इंस्टाग्राम - इत्येतेषु सञ्चारमाध्यमेषु तञ्जानियादेशीयौ भ्रातृ-भगिन्यौ किलि-पॉलः, तदीया भगिनी नीमा च प्रमुखचर्चायां स्तः, अथ च अहं सुदृढं

विश्वसिमि यत्, भवद्भिः अपि एतेषां विषये श्रुतं भवेत् । तयोः भारतीय-संगीत-विषये अत्यन्तं रुचिः अस्ति, उन्मत्तता अस्ति, अथ एतेन कारणेन ते अत्यन्तं लोकप्रिये स्तः । Lip Sync- इति ओष्ठानुकरणस्य तयोः पद्धत्या ज्ञायते यत् एतदर्थं ते कियन्तं परिश्रमं कुरुतः । अनतिचिरम् एव, गणतन्त्रदिवसस्य अवसरे अस्माकं राष्ट्रगानं 'जन-गण-मन' इति गायन्त्योः तयोः चलचित्रं अत्यन्तं प्रसृतम् । कतिपयदिनानि पूर्वं ताभ्यां लता-भगिन्याः गीतं गीत्वा तस्यै अपि भावपूर्णः श्रद्धांजलिः दत्तः आसीत् । अहम् एतस्य अद्भुतनवाचारस्य कृते एताभ्यां भ्रातृभगिनीभ्यां किलि-नीमा-चेत्येताभ्याम् अत्यन्तम् अभिनन्दामि वर्धापयामि च । कतिपयदिनानि पूर्वं तञ्जानियादेशे भारतीय-दूतावासे एतयोः सम्माननम् अपि कृतम् आसीत् । भारतीय-संगीतस्य इन्द्रजालः एव एतादृशः अस्ति, यः सर्वान् सम्मोहयति । अहं स्मरामि यत्, कतिपय-वर्षाणि पूर्वं विश्वस्य सार्धैकशताधिकानां देशानां गायक-संगीतकारैः स्वीयदेशेषु, स्वीयवेशभूषायां पूज्य-बापूवर्यस्य प्रियस्य, महात्मगान्धिनः 'वैष्णव जन' इति प्रियभजनस्य, गानस्य सफलप्रयोगः कृतः आसीत् ।

अद्य यदा भारतं स्वीय-स्वातन्त्र्यस्य पञ्चसप्ततितमवर्षस्य महत्वपूर्णं पर्व आमानत् अस्ति, तदा देशभक्ति-गीतानि आधृत्य अपि एतादृशाः प्रयोगाः भवितुम् अर्हन्ति । यत्र विदेश- नागरिकान्, तत्रत्यान् प्रसिद्धगायकान्, भारतीय-देशभक्ति-गीतानि गातुं आमन्त्रयेम । न एतावत् एव, यदि तंजानियादेशे किलि-नीमे भारत-गीतेषु एवंप्रकारेण ओष्ठानुकरणम् कर्तुं शक्नुतः चेत्, तर्हि किं मम देशे, अस्माकं देशस्य अनेकासु भाषासु, नैकप्रकारकाणि गीतानि सन्ति, किं वयं केचन गुजरातबालाः तमिलगीतेषु ओष्ठानुकरणं कुर्याम, केचन केरलबालाः असमिया-गीतेषु कुर्युः, केचन कन्नड़भाषि-बालाः जम्मू-कश्मीरस्य गीतेषु कुर्युः । वयम् एतादृशं वातावरणं स्रष्टुं शक्नुमः, येन 'एकं भारतं - श्रेष्ठं भारतम्' इत्यस्य अनुभवं कर्तुं शक्नुयाम । न अलम् एतेन, वयं स्वतन्त्रतायाः अमृतमहोत्सवम् अभिनवरूपेण अवश्यम् आमानयितुं शक्नुमः | अहं देशस्य नवयुवकान् प्रति

आह्वानं करोमि, आयान्तु, भारतीय-भाषासु प्रसिद्धानां गीतानां स्वपद्धत्या चलचित्रं निर्मान्तु, अनेन भवन्तः अत्यन्तं प्रसिद्धाः भविष्यन्ति, अथ च एतेन देशस्य विविधतायाः परिचयः युवसन्ततेः कृते भविष्यति |

मम प्रियाः देशवासिनः, अधुना एव, कतिपयदिनानि पूर्वम् अस्माभिः मातृभाषा-दिवसः आमानितः । ये विद्वज्जनाः सन्ति, ते खलु मातृभाषा-शब्दस्य उद्भव-उत्पत्त्यादिविषये शैक्षणिकं व्याख्यानं कर्तुं शक्नुवन्ति । अहं तु मातृभाषायै एतावद् एव कथयामि - यथा अस्मज्जीवनं मात्रा निर्मीयते, तथैव, मातृभाषा अपि, अस्माकं जीवनं विनिर्माति | माता मातृभाषा च, उभे अपि मिलित्वा जीवनस्य आधारं दृढं कुरुतः, चिरञ्जीवं च कुरुतः । यथा, वयं स्वमातरं त्यक्तुं नैव शक्नुमः, तथैव, स्वमातृभाषाम् अपि त्यक्तुं न शक्नुमः। बहुवर्षपुरातनं वृत्तं स्मरामि, यदा मम अमेरिका-प्रवासः आसीत्, तदा, विभिन्नपरिवारेषु गन्तुम् अवसरः भवति स्म, एकदा कस्मिन्श्चित् तेलुगू-परिवारे गन्तुम् अवसरः प्राप्तः, अथ तत्र अत्यन्तं हर्षकरं दृश्यम् अहम् अपश्यम् । तैः अहं ज्ञापितः यत् - अस्माभिः परिवारे नियमः कृतः यत् कियत् अपि कार्यं भवतु, परं यदि वयं नगरात् बहिः न स्मः तर्हि परिवारस्य, सर्वे सदस्याः रात्रिभोजनसमये एकत्र मिलामः एव, अपरं च भोजनसमये प्रत्येकं जनः तेलुगू-भाषायाम् एव सम्भाषिष्यते इति | ये बालाः तत्र लब्धजन्मानः आसन्, तेभ्यः अपि एषः नियमः आसीत् | स्व-मातृभाषां प्रति एतादृशं प्रेम दृष्ट्वा एतेन परिवारेण अहं अत्यन्तं प्रभावितः आसम् ।

सखायः, स्वतन्त्रतायाः पञ्चसप्ततिवर्षाणाम् अनन्तरम् अपि केचन जनाः एतादृशे मानसिक-द्वन्द्वे जीवन्ति येन ते स्वभाषाम्, स्ववेशं, स्वभोजनपद्धतिं च अवलम्ब्य संकोचम् अनुभवन्ति, यद्यपि, विश्वे अन्यत्र एवं नास्ति | अस्माकीना मातृभाषा अस्ति, सगर्वम् अस्माभिः भाषणीया । अस्माकं भारतं तु भाषाविषयेषु एतावत् समृद्धम् अस्ति यत् तस्य तुलना एव न भवितुम् अर्हति | अस्माकं भाषाणाम् सर्वतः महती चारुता एषा अस्ति यत् कश्मीरतः कन्याकुमारीपर्यन्तं, कच्छतः कोहिमापर्यन्तं च शतशः भाषाः, सहस्रशः

उपभाषाः च, परस्परं भिन्नाः सत्यः अपि, मिथः अभेदभावनायुताः सन्ति - भाषाः अनेकाः - भावः एकः । आ बहोः कालात् अस्माकं भाषाः परस्परं शिक्षयन्त्यः आत्मानं परिष्कुर्वत्यः सन्ति, परस्परं विकासं च कुर्वन्ति । भारते विश्वस्य सर्वतः प्राचीना भाषा 'तमिल' अस्ति, अथ च प्रत्येकं भारतीयः एतस्यै गर्वम् अनुभवेत् यत् विश्वस्य एतावान् बृहन् न्यासः अस्माकं पार्श्वे अस्ति । तेन एव प्रकारेण यावन्ति पुरातनानि धर्मशास्त्राणि सन्ति, तेषाम् अभिव्यक्तिः अपि अस्माकं संस्कृतभाषायाम् अस्ति | भारतस्य जनाः, प्रायः एकविंशति-अधिकशतम् (121), अर्थात् वयं गर्वम् अनुभविष्यामः यत् एकविंशति-अधिकशत-प्रकारिकाभिः मातृ-भाषाभिः साकं वयं सम्पृक्ताः स्मः, एतासु चतुर्दशभाषाः तु एवंभूताः सन्ति याः एककोटितोऽप्यधिकाः जनाः दैनिकोपयोगेषु भाषन्ते | अर्थात्, यावती अनेषां यूरोपस्थानां देशानाम् आहत्य जनसंख्या नास्ति, तस्याः अधिकजनाः अत्र विभिन्नाभिः चतुर्दशभाषाभिः सम्पृक्ताः सन्ति । नवदशाधिकद्विसहस्रतमे वर्षे, हिन्दीभाषा, विश्वस्य सर्वाधिकासु भाषमाणासु भाषासु तृतीये क्रमांके अवर्तत | एतदर्थम् अपि प्रत्येकं भारतीयेन गर्वः अनुभवितव्यः। भाषा, केवलम् अभिव्यक्ते एव माध्यमभूता नास्ति, अपि तु, भाषा, समाजस्य संस्कृतिं रिक्थं च संरक्षति ।
स्वभाषान्यासस्य संरक्षणस्य एतादृशम् एव कार्यं सूरीनाम-देशे सुरजन-परोही-वर्यः कुर्वन् अस्ति | एतस्य मासस्य द्वितीये दिनाङ्के सः चतुरशीतिवर्षीयः जातः । तस्य पूर्वजाः अपि बहुपूर्वं, सहस्रशः श्रमिकैः सह, वृत्त्यै उदरपूर्त्यै वा सूरीनामदेशं गताः आसन् । सुरजन-परोही-वर्यः हिन्दीभाषायाम् अत्यन्तम् उत्कृष्टाः कविताः लिखति, तत्रत्येषु राष्ट्रियकविषु तदीयनाम स्वीक्रियते । अर्थात्, अद्यापि तस्य हृदये हिन्दुस्थानभावः उद्दीप्तः भवति, तदीय-कार्येषु हिन्दुस्थान-मृत्तिकायाः सुगन्धः अस्ति । सूरीनामदेशवासिभिः सुरजन-परोही-वर्य-नाम्ना कश्चित् संग्रहालयः अपि निर्मितः । मत्कृते अत्यन्तं सुखदानुभवः एषः यत् (2015) पञ्चदशाधिक-द्विसहस्रतमे वर्षे तदीयं सम्माननं कर्तुम् अहम् अवसरं प्राप्तवान् ।

सखायः, अद्य, अर्थात्, फरवरीमासस्य सप्तविंशे दिने मराठी-भाषा-गौरव-दिवसः अपि अस्ति ।

("सर्व मराठी बंधु भगिनिना मराठी भाषा दिनाच्या हार्दिक शुभेच्छा|")
"सर्वेभ्यः मराठी-बंधु-भगिनीभ्यः मराठी-भाषा-दिनस्य हार्दिक्यः शुभेच्छाः विलसन्तु |"

एतत् दिनं मराठीकविराजाय, विष्णु-बामन-शिरवाडकर-वर्याय,श्रीमते कुसुमाग्रजवर्याय च समर्पितः अस्ति । अद्य एव कुसुमाग्रजवर्यस्य जन्मजयन्ती अपि अस्ति । कुसुमाग्रजवर्येण मराठीभाषायां कविताः रचिताः, अनेकानि नाटकानि लिखितानि, मराठीसाहित्यं च नवकीर्तिं यावत् प्रापितम् |

सखायः, अस्माकं देशे भाषाणां स्वीयाः विशेषताः सन्ति, मातृभाषायाः स्वकीयं विज्ञानम् अस्ति । एतत् विज्ञानम् अवगम्य, राष्ट्रिय- शिक्षानीतौ, स्थानीयभाषायाम् एव अध्ययनार्थं बलं प्रदत्तम् | अस्माकं व्यावसायिकपाठ्यक्रमाः अपि स्थानीयभाषासु पाठिताः भवेयुः, एतदर्थं प्रयासाः जायन्ते । स्वतन्त्रतायाः अमृतकाले एते प्रयासाः अस्माभिः मिलित्वा वर्धापनीयाः, एतत् खलु स्वाभिमान- कार्यम् । अहम् इच्छामि, भवन्तः यां काम् अपि मातृभाषां वदन्ति, तस्याः विशेषताः अवश्यं जानन्तु, तद्विषये किञ्चित् किञ्चित् अवश्यं लिखन्तु |

सखायः, कतिपय-दिनानि पूर्वं मम मेलनं, मदीयेन मित्रेण केनियादेशस्य च पूर्वप्रधानमन्त्रिणा राइला-ओडिंगा-वर्येण जातम् । एतत् मेलनं रुचिकरं तु आसीत्, सहैव अत्यन्तं भावुकम् अपि आसीत् । आवां घनिष्ठ-मित्रे स्वः, तस्मात् स्फुटतया वार्ताः अपि कुर्वः । यदा आवां सम्भाषणं कुर्वन्तौ आस्व तदा ओडिंगा-वर्यः स्वकीयायाः पुत्र्याः विषये उक्तवान् । तस्य पुत्री Rosemary इति, तस्यै Brain Tumour इति मस्तिष्करोगः आसीत्, अथ एतेन कारणेन तेन स्वपुत्र्याः शल्यं कारितम् । परं, चिकित्सायाः दुष्परिणामः एषः जातः यत् Rosemary- इत्यस्याः नेत्रज्योतिः गतप्रायः अभवत्, दृष्टिः

बाधिता | अधुना भवन्तः कल्पनां कर्तुं शक्नुवन्ति यत् तस्याः कन्यायाः स्थितिः कीदृशी सञ्जाता भवेत्, तस्य पितुः च स्थितेः अपि वयम् अनुमानं कर्तुं शक्नुमः, तदीयभावनाः अवगन्तुं शक्नुमः | तेन विश्वस्य अनेके चिकित्सालयाः, तादृशः कोऽपि बृहद्देशः न स्यात्, यत्र तेन स्वपुत्र्याः चिकित्सायै पूर्णप्रयासः न कृतः | विश्वस्य सर्वे बृहद्देशाः अन्विष्टाः परं न काचिदपि सफलता अधिगता, एकप्रकारेण सर्वाः आशाः त्यक्ताः, पूर्णगृहे निराशायाः वातावरणम् आसीत् । एतस्मिन् एव क्रमे, केनचित् सः, भारते, आयुर्वेदपद्धत्या चिकित्सायै परामृष्टः । सः अपि बहुविधम् आचर्य श्रान्तः इव आसीत्,तथापि आशान्वितः सन् एकवारम् इतोऽपि प्रयत्नं कृतवान् । भारतम् आगत्य केरलस्य एकस्मिन् आयुर्वेद-चिकित्सालये एतेन स्वपुत्र्याः चिकित्सा आरब्धा । दीर्घकालं यावत् पुत्री अत्रैव अवर्तत | आयुर्वेदस्य चिकित्सायाः एषः प्रभावः जातः यत् Rosemary-पुत्र्याः नेत्रज्योतिः अधिकांशतः प्रत्यागतः । भवन्तः कल्पनां कर्तुं शक्नुवन्ति, यत् तया नवजीवनम् एव प्राप्तम्, अथ ज्योतिः तु Rosemary इत्यस्याः जीवने आगतः परं पूर्णपरिवारे एकः नवज्योतिः, जीवनस्य नवकिरणः आगतः । अधुना ओडिंगा-वर्यः अतिभावुकः सन् माम् अज्ञापयत् यत् तदीया इच्छा अस्ति यत्, भारतस्य आयुर्वेदज्ञानं, यद् विज्ञानम् अस्ति तत् विज्ञानं केनियादेशं नयेयम् । ये खलु पादपाः अस्यां चिकित्सायाम् उपयोगिनः भवन्ति, तेषां कृषिं करिष्यामः, एतेषां लाभः अधिकजनेभ्यः भवतु, तदर्थम् अपि सः पूर्णप्रयासं करिष्यति ।

मम कृते अत्यन्तं प्रसन्नतायाः विषयः अस्ति यत् अस्मत्मातृभूम्या, परम्परया च कस्यापि जीवनात् एतावत् महत् कष्टम् अपगतम् । एतत् श्रुत्वा भवताम् अपि आनन्दः जातः स्यात् । कः भारतवासी एतादृशः स्यात् यस्मै एतादृशः अभिमानः न स्यात् । वयं सर्वेऽपि जानीमः यत् न केवलम् ओडिङ्गावर्यः एव अपितु विश्वस्य लक्षशः जनाः आयुर्वेदात् लाभान्विताः जायमानाः सन्ति ।

ब्रिटेनदेशस्य प्रिंस-चार्ल्सः अपि आयुर्वेदस्य महत्सु प्रशंसकेषु अन्यतमः वर्तते । यदापि मम तेन सह मेलनं भवति सः आयुर्वेदविषये अवश्यं चर्चां करोति । भारतस्य अनेकासां आयुर्वेदीय-संस्थानां विषये तस्य ज्ञानम् अपि अस्ति ।

सखायः! विगतेषु सप्तषु वर्षेषु देशे आयुर्वेदस्य प्रचार-प्रसार-विषये अत्यधिकम् अवधानं कृतं वर्तते । आयुष-मन्त्रालयस्य विरचनया चिकित्सा-स्वास्थ्याभ्यां युक्तं अस्माकं पारम्परिकविधिं लोकप्रियं कर्तुं यः सङ्कल्पः आसीत्, सः इतोऽपि दृढतां गतः । अहम् एतदर्थम् अत्यन्तं प्रसन्नः अस्मि यत् विगते अल्पे एव काले आयुर्वेदक्षेत्रे अपि अनेके व्यावसायिकाः Start-up-इति नवाचाराः  अस्मत्पुरतः समायाताः । अस्य एव मासस्य आरम्भे आयुष-व्यावसायिक-नवाचार-समाह्वानानि (Ayush Start-up Challenges)-इति आरब्धानि । एतेषां समाह्वानानां लक्ष्यम् अस्मिन् क्षेत्रे कार्यरतान् व्यावसायिक-नवाचारान् अभिज्ञाय तेषां साहाय्यकरणम् अस्ति । अस्मिन् क्षेत्रे कार्यरतेषु  युवषु मम आग्रहः वर्तते यत् ते अस्मिन् समाह्वाने अवश्यं सहभागं कुर्युः ।

सखायः ! यदा एकवारं जनाः सम्भूय किमपि कर्तुं निश्चिन्वन्ति तदा ते अद्भुतं साधयन्ति । समाजे एतादृशानि नैकानि परिवर्तनानि अभवन्, यत्र एतादृशस्य जन-सहभागस्वरूपस्य सामूहिकप्रयत्नस्य अत्यन्तं महत्वपूर्णा भूमिका अवर्तत । “जल-थल-अभियान”-नाम्ना एतादृशमेव किञ्चन जनान्दोलनं कश्मीरस्य श्रीनगरे प्राचलत् । एषः श्रीनगरस्य सरोवरतडागादीनां स्वच्छतां, तदीयां प्राचीनां चारुतां पुनः संवर्धयितुम् एकः अनुपमः प्रयत्नः अस्ति । “जल-थल-अभियान”-स्य अवधानकेन्द्रं  “कुशल-सार” , “गिल-सार” चेत्यनयोः वर्तते

। जनसहभागितया सह अस्मिन्, प्रविधेः अपि अत्यन्तं साहाय्यं स्वीक्रियते । कुत्र अतिक्रमणम्, अवैधरूपेण निर्माणं वा जातं वर्तते इत्येतस्य परिज्ञानाय अस्य क्षेत्रस्य सर्वेक्षणं कारितम् । अनेन सहैव सुनम्य-अवकराणाम् ( Plastic Waste ) अपसारणार्थम्, अवकर- स्वच्छतार्थं च अभियानं प्रचालितम् । अभियानस्य अपरस्मिन् चरणे प्राचीन-जलस्रोतसां, तडागानां प्रपूरणाय नवदश-उत्सेकानां पुनः पूरणाय ( Restore ) अत्यधिकः प्रयत्नः कृतः । अस्याः पुनःपूरणस्वरूपायाः परियोजनायाः ( Restoration Project ) महनीयतायाः विषये आधिक्येन जागरूकता प्रसरेत् इत्येतदर्थं स्थानीयाः जनाः, युवानः चापि जलस्य राजदूताः ( Water Ambassadors ) कृताः वर्तन्ते । अधुना अत्रत्याः स्थानीयाः जनाः “गिल-सार-लेक” इत्यत्र प्रवासिनां पक्षीणां, मत्स्यानां च सततं सङ्ख्यावर्धनाय प्रयतन्ते । तान् च दृष्ट्वा ते प्रसन्नाः अपि भवन्ति । अहम् अस्मै अनुपमाय प्रयत्नाय श्रीनगरस्य जनेभ्यः नैकान् शुभाशयान् प्रयच्छामि ।

सखायः ! अष्टभ्यः वर्षेभ्यः देशेन यत् ‘‘स्वच्छ-भारताभियानम्” आरब्धं तस्य कालक्रमेण विस्तारः अपि सञ्जातः, विनूतनाः नवाचाराः अपि युक्ताः अभवन् । भारते भवन्तः कुत्रापि गमिष्यन्ति चेत् द्रक्ष्यन्ति यत् सर्वत्र स्वच्छतायै कश्चन प्रयत्नः अवश्यं जायते । असमस्य कोकराझारे एतादृशस्य कस्यचित् प्रयत्नस्य विषये मया ज्ञातम् । अत्र प्रातःकालीनभ्रमणस्य एकेन समूहेन “स्वच्छ-हरिताभियान”स्य अन्तर्गतत्वेन उत्तमारम्भः कृतः वर्तते । एतैः सर्वैः नूतने सेतुक्षेत्रे त्रिकिलोमीटर-मितस्य दीर्घस्य मार्गस्य स्वच्छतां कृत्वा स्वच्छताविषयकः महान् सन्देशः प्रदत्तः । एतेन प्रकारेण विशाखापत्तने “स्वच्छभारत-अभियानान्तर्गतत्वेन सुनम्य- स्यूतानाम् अपेक्षया वस्त्रस्यूताः आधिक्येन प्रयुज्यन्ते । अत्रत्याः जनाः पर्यावरणं स्वच्छीकर्तुं एकदा उपयुज्यमानानाम् सुनम्य-उत्पादानां विरुद्धम् अभियानं प्रचालयन्ति । अनेन

सहैव एते जनाः गृहे एव अवकराणां पृथक्करणाय जनान् जागरूकान् अपि कुर्वन्ति । मुम्बय्याः सोमैयामहा -विद्यालयस्य छात्राः स्वच्छतायाः स्वकीये अभियाने सौन्दर्यम् अपि सम्मेलितवन्तः सन्ति । एते कल्याण-रेल-स्थानकस्य भित्तिं सुन्दरीभिः चित्र-कलाकृतिभिः सज्जीकृतवन्तः सन्ति । राजस्थानस्य सवायी-माधोपुरस्य अपि प्रेरकम् उदाहरणं मया ज्ञातम् । अत्रत्याः युवानः रणथम्भौरे Mission Beat Plastic- इति सुनम्य-समाप्ति-अभियान-नाम्ना आन्दोलनं चालितवन्तः, यस्य अन्तर्गततत्वेन रणथम्भौरस्य अरण्यात् सुनम्यानि, सुनम्यस्यूताः च अपसारिताः सन्ति । सर्वेषां प्रयत्नस्य इयं भावना देशे जनसहभागितां सुदृढां कुर्वन्ति । किञ्च यदा जनसहभागिता भवति तदा महान्ति अपि लक्ष्याणि अवश्यं साधितानि भवन्ति ।

मम प्रियाः देशवासिनः ! इतः परं कतिपयदिनानाम् अनन्तरमेव मार्चमासस्य अष्टमे दिनाङ्के सम्पूर्णे विश्वे अन्ताराष्ट्रिय- महिलादिवसः आचरिष्यते । महिलानां साहसेन, कौशलेन, प्रतिभया च युक्तानि अनेकानि उदाहरणानि अस्माभिः 'मनकीबात'-प्रसारणेन सहक्रियन्ते । अद्यत्वे कौशलमयं भारतम्, स्वयं-सहायता-समूहः, लघवः विशालाः वा उद्योगाः भवन्तु, महिलाः सर्वत्र सहभागितां कुर्वन्ति । भवन्तः कस्मिन् अपि क्षेत्रे अवलोकयन्तु नाम, महिलाः प्राचीनाः धारणाः निराकुर्वन्ति । अद्यत्वे अस्माकं देशे संसदम् आरभ्य पञ्चायतं यावत् पृथक्-पृथक् कार्यक्षेत्रे नूतनतया औन्नत्यानि प्राप्नुवन्ति । सेनायाम् अपि पुत्र्यः अधुना नूतनानि महान्ति च दायित्वानि निर्वहन्ति । विगते मासे गणतन्त्रदिवसे वयं दृष्टवन्तः यत् आधुनिकानि युद्धविमानानि अपि पुत्र्यः उड्डाययन्ति । देशः पुत्रीणां सैनिकविद्यालयेषु प्रवेशार्थं प्रतिबन्धम् अपसारितवान् । सम्पूर्णे च देशे पुत्र्यः सैनिकविद्यालयेषु प्रवेशं कुर्वन्ति । एवमेव स्वकीयं नवाचार-व्यवसायजगत् अवलोकयन्तु ।

विगतेषु वर्षेषु सहस्रशः नवाचारव्यवसायाः आरब्धाः । एतेषु प्रायशः अर्धं नवाचारव्यवसायेषु महिलाः निदेशकभूमिकायां सन्ति । विगतेषु अल्पेषु एव कालेषु महिलाभ्यः मातृत्वावकाशवर्धनसम्बद्धाः निर्णयाः कृताः सन्ति । अद्यत्वे पुत्रेभ्यः, पुत्रीभ्यः च समानान् अधिकारान् प्रददन् विवाहस्य वयोमितेः समानतायै देशः प्रयत्नं करोति । अनेन सर्वेषु क्षेत्रेषु महिलानां सहभागिता विवर्धते । भवन्तः देशे इतोऽपि एकं जायमानं महत् परिवर्तनम्

अपि अवलोकयन्तः स्युः । एतत् परिवर्तनम् अस्ति - अस्माकं सामाजिक-अभियानस्य साफल्यम् । "पुत्रीं रक्षन्तु - पुत्रीं पाठयन्तु" इत्येतस्य अभियानस्य साफल्यम् अवलोकयामः चेत् अद्यत्वे लिङ्ग-अनुपाते परिष्कारः जायते । विद्यालयं प्रति गच्छन्तीनां पुत्रीणां सङ्ख्यायाम् अपि परिष्कारः जातः । अत्र अस्माकम् अपि दायित्वम् अस्ति यत् अस्माकं पुत्र्यः मध्ये एव विद्यालयं न त्यजेयुः । अनेन प्रकारेण स्वच्छभारत-अभियानस्य अन्तर्गतत्वेन महिलाभ्यः अनावृत-स्थले शौचात् मुक्तिः प्राप्ता अस्ति । त्रिधा वचनपुरस्सरं विवाहविच्छेदसदृश्याः सामाजिक-कुप्रथायाः अपि समाप्तिः जायते । यदा आरभ्य त्रिधा वचनपुरस्सरं विवाहविच्छेदस्य विरुद्धं विधिः समागतः वर्तते, तदा आरभ्य त्रिधा वचनपुरस्सरं विवाहविच्छेदस्य प्रसङ्गेषु प्रतिशतम् अशीतिसङ्ख्यामिता न्यूनता आगता । एतानि सर्वाणि परिवर्तनानि एतावता अल्पेन एव कालेन कथं जायन्ते? एतानि परिवर्तनानि एतदर्थमेव जायन्ते, यतो हि अस्माकं देशे परिवर्तनानां, प्रगतिशीलानां च प्रयत्नानां नेतृत्वं साम्प्रतं महिलाः स्वयम् एव कुर्वन्ति ।

मम प्रियाः देशवासिनः! श्वः फेब्रुअरी- मासस्य अष्टाविंशतिदिनाङ्के 'राष्ट्रियविज्ञान- दिनम्' अस्ति । एतत् दिनम् Raman Effect- इति

रमणप्रभावस्य अन्वेषणाय अपि ज्ञायते । अहं सी.वी.रमण-वर्यसहितं तेभ्यः सर्वेभ्यः वैज्ञानिकेभ्यः आदरपूर्वकं श्रद्धाञ्जलीन् समर्पयामि यैः अस्माकं वैज्ञानिकयात्रायाः समृद्ध्यै स्वीयं

महत्वपूर्णं योगदानं कृतम् ।

सखायः! अस्माकं जीवने सुगमतायां, सरलतायां च प्रविधिना महत्स्थानम् अर्जितम् अस्ति । कः प्रविधिः उत्तमः, कस्य प्रविधेः उत्कृष्टतमः प्रयोगः कथं भवेत् इत्येतैः सर्वैः विषयैः वयं सम्यक्तया यथासमयं परिचिताः भवामः । परम् एतद् अपि सत्यं यत् स्व-कुटुम्बस्य बालेभ्यः तस्य प्रविधेः आधारः कः? तस्य पृष्ठतः किं विज्ञानम्? एतस्यां दिशि अस्माकं अवधानम् एव न भवति । एतस्मिन् विज्ञानदिवसे सर्वपरिवारान् प्रति आग्रहं करोमि यत् ते स्वबालेषु वैज्ञानिकस्वभावस्य विकासं कर्तुम् अवश्यं लघु लघु प्रयासान् कर्तुं शक्नुवन्ति ।

अधुना यथा सम्यक् न दृश्यते परम् उपनेत्रधारणानन्तरं सम्यक् दृश्यते चेत् बालान् एतस्य पृष्ठतः उपस्थितं विज्ञानम् अत्यन्तं सम्यक्तया अवगमयितुं शक्नुमः । केवलं उपनेत्रदर्शनम् आनन्दाय एव न । अधुना सावधानतया भवन्तः कस्मिंश्चित् लघुकागदे तं बोधयितुं शक्नुवन्ति । अधुना सः Mobile Phone इति जङ्गम-दूरभाषस्य उपयोगं करोति । Calculator इति गणनयन्त्रं कथं कार्यं करोति? Remote Control इति दूरस्थं स्वचालितयन्त्रं कथं कार्यं करोति? Sensor इति संवेदकं किम्? एतादृश्यः विज्ञानविषयिण्यः वार्ताः कारणपुरस्सरं गृहे चर्चिताः भवन्ति वा? सरलतया भवितुम् अर्हन्ति । यानि सर्वाणि दैनन्दिनप्रयोगवस्तूनि भवन्ति तानि किं, कथं च कार्यं कुर्वन्ति? तस्य पृष्ठतः किं विज्ञानम् अस्ति? इत्येतत्

सर्वम् अपि सरलतया बोधयितुं शक्नुमः । तेन एव प्रकारेण किम् अस्माभिः कदापि बालैः सह आकाशः दृष्टः? रात्रौ तारकाणां विषये अपि वार्ताः अवश्यं कृताः स्युः । विभिन्नानि तारामण्डलानि दृश्यन्ते । तेषां विषये विज्ञापयन्तु । एवं कृत्वा भवन्तः बालकेषु भौतिकशास्त्रं, खगोलविज्ञानं च प्रति नवरुचिम् उत्पादयितुं शक्नुवन्ति । अद्यत्वे तु विभिन्नानि App-इति अन्तर्जालिकानि माध्यमानि अपि सन्ति यैः भवन्तः तारकाणां, ग्रहाणां च स्थितिम् अवलोकयितुं शक्नुवन्ति. किञ्च या तारका आकाशे दृश्यते ताम् अभिज्ञातुं शक्नुवन्ति । तस्मिन् विषये ज्ञातुम् अपि शक्नुवन्ति । अद्य अहं कोरोना-विषाणुविरुद्धे युद्धे भारतीयैः वैज्ञानिकैः निर्व्यूढायाः भूमिकायाः अपि प्रशंसां कर्तुम् इच्छामि । तेषां कठोरपरिश्रमस्य परिणामेन एव भारतनिर्मितस्य सूच्यौषधस्य निर्माणं सम्भवं जातं, येन विश्वं लाभान्वितं सञ्जातम् । विज्ञानस्य मानवतायै एषः एव उपहारः अस्ति ।

मम प्रियाः देशवासिनः ! एतस्मिन् पर्याये अपि अस्माभिः अनेकेषु विषयेषु चर्चा कृता । आगम्यमाने मार्चमासे अनेकानि पर्वाणि, उत्सवाः च आयान्ति । महाशिवरात्रिः अस्ति । अथ च कतिपयदिनानन्तरं भवन्तः सर्वे होलिकापर्वणः सज्जतायां तत्पराः भविष्यन्ति । होलिकापर्व अस्मान् सर्वान् एकस्मिन् सूत्रे संयोजयति । एतस्मिन् स्वकीयाः - परकीयाः, द्वेषः - विद्वेषः, लघुः - विशालः वेति सर्वे भेदाः अपगच्छन्ति । अतः कथ्यते यत् होलिकापर्वणः वर्णैः अपि अधिकः दृढतरः वर्णः होलिकापर्वणि प्रेमसौहार्दयोः भवति । होलिकापर्वणि गुजिया-भोज्येन सह सम्बन्धानाम् अपि अनन्या मधुरता भवति । एते सम्बन्धाः अस्माभिः इतोऽपि दृढतराः करणीयाः, अथ च एते सम्बन्धाः केवलं स्व-कटुम्ब-जनैः सह एव न, अपि तु तैः जनैः सह अपि करणीयाः, ये भवतां बृहद्कटुम्बस्य अङ्गभूताः सन्ति । एतदर्थं सर्वतः

महत्वपूर्णं माध्यम् अपि सर्वदा स्मरणीयम् । एतत् च माध्यमम् अस्ति - 'Vocal for Local' इति स्थानीयोत्पादानां प्रखर-प्रचारेण सहैव उत्सवानाम् आचरणस्य ।

भवन्तः पर्वावसरेषु स्थानीयोत्पादान् क्रीणन्तु, येन भवतां परिपार्श्व-वर्तिनां जनानां जीवने अपि परिरङ्गः सम्भृतः स्यात्, रङ्गः प्रभवेत्, उत्साहः च स्यात् | अस्मदीयः देशोऽयं यावत्या सफलतया कोरोना-व्याधिं विरुद्ध्य युध्यति, अपि चाग्रेसरन् अस्ति, तेन हि एतेषु उत्सवेषु समुत्साहः अपि अनेकधा वर्धितोऽस्ति | अमुना समुत्साहेन साकम् अस्माभिः स्वीयाः उत्सवाः परिपालनीयाः सन्ति, तथा च, युगपदेव, स्वीया अवधानता अपि संधारणीया अस्ति | अहं भवद्भ्यः सर्वेभ्यः आगम्यमानानां पर्वणां कृते भूयसीः शुभकामनाः व्याहरामि | अहं सर्वदैव भवतां वृत्तानि, भवतां पत्राणि, भवतां च सन्देशान् सततं प्रतीक्षिष्ये | कोटिशो धन्यवादाः |

*****

[भाषान्तरं- डॉ.सुधीष्टमिश्र-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.com